श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये सप्तचत्वारिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये सप्तचत्वारिंशं दशकम् ॥

## उलूखलबन्धनवर्णनम्

एकदा दधिविमाथकारिणीं
    मातरं समुपसेदिवान् भवान्।
स्तन्यलोलुपतया निवारय -
    न्नङ्कमेत्य पपिवान् पयोधरौ ॥ 47.1 ॥

अर्धपीतकुचकुड्मले त्वयि
    स्निग्धहासमधुराननाम्बुजे।
दुग्धमीश दहने परिस्रुतं
    धर्तुमाशु जननी जगाम ते ॥ 47.2 ॥

सामिपीतरसभङ्गसङ्गत -
    क्रोधभारपरिभूतचेतसा।
मन्थदण्डमुपगृह्य पाटितं
    हन्त देव दधिभाजनं त्वया ॥ 47.3 ॥

उच्चलद्ध्वनितमुच्चकैस्तदा
    सन्निशम्य जननी समाद्रुता।
त्वद्यशोविसरवद् ददर्श सा
    सद्य एव दधि विस्तृतं क्षितौ ॥ 47.4 ॥

वेदमार्गपरिमार्गितं रुषा
    त्वामवीक्ष्य परिमार्गयन्त्यसौ।

सन्ददर्श सुकृतिन्युलूखले
    दीयमाननवनीतमोतवे ॥ **47.5** ॥

त्वां प्रगृह्य बत भीतिभावना -
    भासुराननसरोजमाशु सा।
रोषरूषितमुखी सखीपुरो
    बन्धनाय रशनामुपाददे ॥ **47.6** ॥

बन्धुमिच्छति यमेव सज्जन -
    स्तं भवन्तमयि बन्धुमिच्छती।
सा नियुज्य रशनागुणान् बहून्
    द्व्यङ्गुलोनमखिलं किलैक्षत ॥ **47.7** ॥

विस्मितोत्स्मितसखीजनेक्षितां
    स्विन्नसन्नवपुषं निरीक्ष्य ताम्।
नित्यमुक्तवपुरप्यहो हरे
    बन्धमेव कृपयाऽन्वमन्यथाः ॥ **47.8** ॥

स्थीयतां चिरमुलूखले खले -
    त्यागता भवनमेव सा यदा।
प्रागुलूखलबिलान्तरे तदा
    सर्पिरर्पितमदन्नवास्थिथाः ॥ **47.9** ॥

यद्यपाशसुगमो विभो भवान्
    संयतः किमु सपाशयाऽनया।
एवमादि दिविजैरभिष्टुतो
    वातनाथ परिपाहि मां गदात् ॥ **47.10** ॥

॥ इति श्रीमन्नारायणीये सप्तचत्वारिंशं दशकं समाप्तम् ॥